**दिनाङ्क :- 23.07.2025** **प्रातः - 06:55**

## प्रधानमन्त्री-लंदननगरम्

प्रधानमन्त्री नरेन्द्रमोदी भारत-ब्रिटेनयोः द्विपक्षीयसम्बन्धान् इतोऽपि सुदृढीकर्तुं औपचारिकयात्रायां अद्य सायं यूनाईटेड-किंगडम-देशं सम्प्राप्स्यति। स्वीय-ब्रिटिशसमकक्षेण श्री-कीर-स्टारमर इत्यनेन आमन्त्रितायां अस्यां यात्रायां, क्षेत्रीयवैश्विकप्रासङ्गिकविषयेषु विचारविनिमयो भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य ब्रिटेन-मालदीवयोः द्विदिनात्मक-यात्रायै प्रस्थास्यति। लंदननगरे आकाशवाण्या सह संवादक्रमे ब्रिटेनस्थेन भारतस्य उच्चायुक्तेन विक्रमकुमार-दोरईस्वामिना उक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः आगामियात्रा उभयदेशयोः कृते लाभप्रदा भविष्यति।

अत्रान्तरे तेनोक्तं यत् भविष्ये मुक्तव्यापारसम्बद्ध सन्धिपत्रे हस्ताक्षराण्यपि भवितुमर्हन्ति सहैव अस्य उभयोः अर्थव्यवस्थयोः उपरि सकारात्मकप्रभावः भविष्यति। गतदिने नवदिल्ल्यां विदेशसचिवेन विक्रम-मिस्री इत्यमुना मीडियाकर्मिभ्यः विज्ञापितं यत् श्रीमोदी तत्र स्वीयेन ब्रिटिशसमकक्षेण कीर-स्टारमर इत्यनेन सह चर्चां साधयिष्यति। अत्रावसरे सह राजा- चार्ल्स-तृतीयेन सहापि मिलिष्यति। अस्यां यात्रायां भारत-ब्रिटेनयोः व्यापक-रणनीतिक-सहभागितायाः समीक्षणं भविष्यति— यत्र रक्षासुरक्षा, व्यापारः, अर्थव्यवस्था, प्रौद्योगिकी-नवाचारः, जलवायुकार्याचरणम्, स्वास्थ्यं, शिक्षा सहैव पारस्परिकजनसहयोगे च विशेषबलं प्रदास्यते।

प्रधानमन्त्री श्रीमोदी द्वितीयचरणे शुक्रवासरे मालदीवदेशस्य द्विदिनात्मक-यात्रायै गमिष्यति। प्रधानमन्त्री नरेन्द्रमोदी शनिवासरे मालदीवस्य स्वतन्त्रतायाः षष्टितम-वार्षिकसमारोहे मुख्यतिथिपदं अलङ्करिष्यति।

## भारतीयवायुमार्ग-विस्तारः

भारतदेशेन पाकिस्तानदेशीयविमानानां स्वदेशीयवायुमार्गे प्रवेशप्रतिबन्धः अगस्तमासस्य त्रयोविंशति-दिनाङ्कं यावत् विस्तारितः। केन्द्रीयनागरिकोड्डयनराज्यमन्त्रिणा मुरलीधर-मोहोल इत्यमुना सन्दर्भेऽस्मिन् विज्ञापयता कथितं यत् पाकिस्तानीय-विमानां भारतीयवायुमार्गे प्रवेशनिषधार्थं नोटम इत्यस्य अवधिः पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य त्रयोविंशतिदिनाङ्कपर्यन्तं विस्तारितः। तोनोक्तं यत् अयं विस्तारः निरन्तर- रणनीतिकविचारान् प्रतिबिम्बयति।

## लोकसभा-राज्यसभास्थगनम्

गतदिने संसदः उभयोः सदनयोः कार्याचरणं विपक्षस्य विरोधप्रदर्शनकारणात् बाधितम्। अत्र तावत् विपक्षीदलेन सिन्दूराभियानं सहैव बिहारे मतदातासूचेः विशेषगहनपुनरीक्षणं समेत्य अन्येषु प्रकरणेषु चर्चायै अभियाचितम्। लोकसभायां संसदीय-कार्यमन्त्रिणा किरेन-रिजिजूः इत्यमुना प्रोक्तं यत् सर्वकारः चर्चायै सन्नद्धः वर्तते परञ्च विपक्षिणः व्यवधानोत्पादनाय प्रवृत्तास्सन्ति। अनवरतं कोलाहलस्य विद्यमानत्वात् सभापतिना कार्याचरणं आदिनाय स्थगितम्। राज्यसभायामपि इयमेव स्थितिः दृष्टिपथमागता यस्मात् कारणात् सभापतिना उच्चसदनस्य कायाचरणं आदिनाय स्थगितम्। अतः पूर्वं मध्याह्न-द्वादशवादने राज्यसभायाः कार्याचरणस्य आरम्भे एव सभापतिना घनश्याम-तिवारी इत्यमुना उपराष्ट्रपतेः जगदीप-धनखड़स्य त्यागपत्रविषये गृहमन्त्रालयस्य अधिसूचना प्रकाशिता। उपाध्यक्षेण जगदीप-धनखड़ेन स्वास्थ्य-कारणात् स्वपदं परित्यक्तम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना सोशल-मीडियासन्देशे श्रीजगदीप-धनखड़स्य सुस्वास्थ्यं प्रार्थितम्। अत्रावसरे प्रधानमन्त्रिणा मोदिना प्रोक्तं यत् श्रीधनखड़ः भारतस्य उपराष्ट्रपतिपदं समेत्य विभिन्नेषु पदेषु स्थित्वा देशसेवायै नैकान् अवसरान् सम्प्राप्तवान्।

**जम्मूकश्मीर-वेबफलकम्**

जम्मू-कश्मीरस्य उपराज्यपालेन मनोजसिन्हा इत्यमुना आतंकवादेन प्रभावितेभ्यः परिवारेभ्यः सौविध्यप्रदानाय वेबपोर्टल-फलकम् उद्घाटितम्।

**क्रीकेटस्पर्धा**

एकदिवसीय-अन्ताराष्ट्रिय- महिलाक्रिकेटस्पर्धायां भारतेन गतरात्रौ चेस्टर-ले-स्ट्रीट-नगरे अन्तिमस्पर्धायां इग्लैण्डदलं त्रयोदशधावनाङ्कैः पराभूय विजयकिरीटं स्वायत्तीकृतम्। आदौ क्रीडयता भारतीय-महिलादलेन पञ्चाशत्क्षेपणचक्रेषु पञ्चक्रीडकानां हानौ अष्टादशाधिक-त्रिशतं धावनाङ्काः समर्जिताः । प्रत्युत्तरे इंग्लैण्डमहिलादलेन पञ्चोत्तरत्रिशतं धावनाङ्काः एव प्राप्ताः।अस्यां स्पर्धायां भारतस्य हरमनप्रीत-कौर इत्येषा चतुरशीतिः कन्दुकेषु द्वयधिकशतं धावनाङ्कान् समर्जितवती ।

**।। इति वार्ताः।।**